॥ रुद्रः ॥

६७

२८

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥ रुद्रप्रारभः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

९१

(2)

श्रीगणेशायनमः॥हरिः॥ॐ॥इडादेवहूर्मनुर्यज्ञनीर्बृह
स्पतिरुक्थामदानिशꣳसिषद्विश्वेदेवाःसूक्तवाचःपृथिविमा
तर्मामाहिꣳसीर्मधुमनिष्येमधुजनिष्येमधुवक्ष्यामिमधुव
दिष्यामिमधुमतींदेवेभ्योवाचमुद्यासꣳशुश्रूषेण्यांमनुष्ये
भ्यस्तंमादेवाअवंतुशोभायैपितरोनुमदंतु॥ॐशांतिःशांतिः
शांतिः॥ॐनमस्तेरुद्रमन्यवउतोतइषवेनमः॥नमस्तेअस्तु
धन्वनेबाहुभ्यामुततेनमः॥यातइषुःशिवतमाशिवंबभूव

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(B)

रुद्र
१

तेधनुः॥शिवाशरव्याया तवतयानो रुद्रमृडय॥याते रुद्रशि
वातनूरघोरापापकाशिनी॥तयानस्तनुवाशंतमया गिरिशं
ताभिचाकशीहि॥यामिषुं गिरिशंतहस्तेबिभर्ष्यस्तवे॥शिवां
गिरित्रतांकुरुमाहिꣳसीः पुरुषंजगत्॥शिवेनवचसात्वा
गिरिशाछावदामसि॥यथानः सर्वमिज्जगदयक्ष्मꣳसुम
नाअसत्॥अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक्॥अ १
ध्यवोचदधिवक्ताप्रथमोदैव्योभिषक्॥अहीꣳश्चसर्वांजंभ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

यन्त्सर्वाश्चयातुधान्यः॥असौयस्ताम्रोअरुणउतबभ्रुःसुमं
गलः॥येचेमाꣳरुद्राअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳ
हेडईमहे॥असौयोवसर्पतिनीलग्रीवोविलोहितः॥उतै
नंगोपाअदृशंनदृशंनुदहार्यः॥उतैनंविश्वाभूतानिसदृष्टो
मृडयातिनः॥नमोअस्तुनीलग्रीवायसहस्राक्षायमी
ढुषे॥अथोयेअस्यसत्वानोहंतेभ्योकरंनमः॥प्रमुंचधन्व
नस्त्वमुभयोरार्त्नियोर्ज्यां॥याश्चतेहस्तइषवःपराताभ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

रुद्र
२

गवोवप॥अवतत्यधनुस्त्वꣳसहस्राक्षशतेषुधे॥निशीर्य्य
शल्यानांमुखाशिवोनःसुमनाभव॥विज्यंधनुःकपर्दिनोवि
शल्योबाणवाꣳउत॥अनेशन्नस्येषवआभुरस्यनिषंगथिः॥
यातेहेतिमीढुष्टमहस्तेबभूवतेधनुः॥तयास्मान्विश्वतः
स्त्वमयक्ष्मयापरिभुज॥नमस्तेअस्त्वायुधायानाततायधृ
ष्णवे॥उभाभ्यामुततेनमोबाहुभ्यांतवधन्वने॥परितेध
न्वनोहेतिरस्मान्वृणक्तुविश्वतः॥अथोयइषुधिस्तवारे

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

अस्मे निधेहि तं ॥१॥ नमो हिरण्यबाहवे सेनान्ये दिशांच
पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनांपतये नमो
नमः सस्पिंजराय त्विषीमते पथीनांपतये नमो नमो बभ्लु
शाय विव्याधिनेंनानांपतये नमो नमो हरिकेशायोपवीति
नेपुष्टानांपतये नमो नमो भवस्य हेत्यै जगतांपतये नमो न
मो रूद्राया तताविने क्षेत्राणांपतये नमो नमः सूतायाहंत्या
य वनानांपतये नमो नमो रोहिताय स्थपतये वृक्षाणांपत

a joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai

(5)

रुद्र
३

येनमोनमोमंत्रिणेवाणिजायकक्षाणांपतयेनमोनमोभु
वंतयेवारिवस्कृतायौषधीनांपतयेनमोनमउच्चैर्घो
षायाक्रंदयतेपत्तीनांपतयेनमोनमःकृत्स्नवीतायधा
वतेसत्वनांपतयेनमः॥२॥नमःसहमानायनिव्याधि
नेआव्याधिनीनांपतयेनमोनमःककुभायनिषंगिणेस्तेना
नांपतयेनमोनमोनिषंगिणइषुधिमतेतस्कराणांपतयेन ३
मोनमोवंचतेपरिवंचतेस्तायूनांपतयेनमोनमोनिचेरवे

(5A)

परिचरायारण्यानांपतयेनमोनमःसृकाविभ्योजिघां
सद्भ्योमुष्णतांपतयेनमोनमोसिमद्भ्योनक्तंचरद्भ्यःप्रकृं
तानांपतयेनमोनमउष्णीषिणेगिरिचरायकुलुंचा
नांपतयेनमोनमइषुमद्भ्योधन्वाविभ्यश्चवोनमोनम
आतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनमआयछ
द्भ्योविसृजद्भ्यश्चवोनमोनमोस्यद्भ्योविध्यद्भ्यश्चवो
नमोनमआसीनेभ्यःशयानेभ्यश्चवोनमोनमःस्वपद्भ्यो
जाग्रद्भ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमः

Joint property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

रुद्र

४

सभाभ्यःसभापतिभ्यश्चवोनमोनमोअश्वेभ्योश्वपतिभ्य
श्चवोनमः॥३॥नमआव्याधिनीभ्योविविध्यंतीभ्यश्चवो
नमोनमउगणाभ्यस्तृंहतीभ्यश्चवोनमोनमोगृत्सेभ्योगृ
त्सपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमो
नमोगणेभ्योगणपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरू
पेभ्यश्चवोनमोनमोमहद्भ्यःक्षुल्लकेभ्यश्चवोनमोनमोर
थिभ्योरथेभ्यश्चवोनमोनमोरथेभ्योरथपतिभ्यश्चवोनमोन
मःसेनाभ्यःसेनानिभ्यश्चवोनमोनमःक्षत्तृभ्यःसंग्रहीतृ
भ्यश्चवोनमोनमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमः

project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

कुलालेभ्यःकर्मारेभ्यश्चवोनमोनमःपुंजिष्टेभ्योनिषादेभ्य
श्चवोनमोनमइषुकृद्भ्योधन्वकृद्भ्यश्चवोनमोनमोमृगयुभ्य
श्वनिभ्यश्चवोनमोनमःश्वभ्यश्वपतिभ्यश्चवोनमः॥ ४ ॥
नमोभवायचरुद्रायचनमःशर्वायचपशुपतयेचनमोनील
ग्रीवायचशितिकंठायचनमःकपर्दिनेचव्युप्तकेशायच
नमःसहस्राक्षायचशतधन्वनेचनमोगिरिशायचशि
पिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वायचवा
मनायचनमोबृहतेचवर्षीयसेचनमोवृध्धायच

Project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7)

रुद्र ५

संहृध्वनेच्चनमोऽग्रियायच्चप्रथमायच्चनमऽआ
शवेच्चाजिरायच्चनमःशीघ्रियायचशीभ्यायच्चनमऊ
र्म्यायच्चावस्वन्यायच्चनमःस्रोतस्यायचद्वीप्यायच्च॥
५॥नमोज्येष्ठायच्चकनिष्ठायच्चनमःपूर्वजायचाप
रजायच्चनमोमध्यमायच्चापगल्भायच्चनमोजघन्य
यच्चबुध्नियायच्चनमःसोभ्यायच्चप्रतिसर्यायच्च
नमोयाम्यायचक्षेम्यायचनमउर्वर्यायच्चखल्यायच्च
नमःश्लोक्यायचा

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(7A)

वसान्योयचनमोवन्यायचकक्ष्यायचनमःश्रवायचप्र
तिश्रवायचनमआशुषेणायचाशुरथायचनमःशूरायचा
वभिंदतेचनमोवर्मिणेचवरूथिनेचनमोबिल्मिनेचकव
चिनेचनमःश्रुतायचश्रुतसेनायच॥ ६ ॥ नमोदुंदुभ्याय
चाहनन्यायचनमोधृष्णवेचप्रमृशायचनमोदूतायचप्र
हितायचनमोनिषंगिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचा
युधिनेचनमःस्वायुधायचसुधन्वनेचनमःस्रुत्यायच
पथ्यायचनमःकाट्यायचनीप्यायचनमःसूद्यायचासर
स्यायचनमोनाद्यायचवैशंतायचनमःकूप्यायचावट्या

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(8)

रुद्र

६

यचनमोवर्ष्यायचावर्ष्यायचनमोमेघ्यायचविद्युत्यायच
नमईध्रियायचातप्यायचनमोवात्यायचरेष्मियायचन
मोवास्तव्यायचवास्तुपायच ॥७॥ नमःसोमायचरुद्रायच
नमस्ताम्रायचारुणायचनमःशंगायचपशुपतयेचनमउ
ग्रायचभीमायचनमोअग्रेवधायचदूरेवधायचनमोहंत्रे
चहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्तारायनमःशं
भवेचमयोभवेचनमःशंकरायचमयस्करायचनमःशिवा
यचशिवतरायचनमस्तीर्थ्यायचकूल्यायचनमःपार्याय

Joint project of the Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(8A)

चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय
चालाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च
प्रवाह्याय च ॥ ८ ॥ नम इरिण्याय च प्रपथ्याय च नमः किंꣳ
शिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्या
य च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च
गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पाꣳस
व्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लो
प्याय चोलप्याय च नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च

A project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(१)

रुद्र ७ पर्णशद्यायचनमोपगुरमाणायचाभिघ्नतेचनमआखिदतेचप्रखिद
तेचनमोवःकिरिकेभ्योदेवानाꣳहृदयेभ्योनमोविक्षीणके
भ्योनमोविचिन्वत्केभ्योनमआनिर्हतेभ्योनमआमीवत्के
भ्यः॥९॥द्रापेअंधसस्पतेदरिद्रंनीललोहित॥एषांपुरुषा
णामेषांपशूनांमाभेर्मारोमोएषांकिंचनाममत॥याते
रुद्रशिवातनूःशिवाविश्वाहभेषजी॥शिवारुद्रस्यभेषजी
तयानोमृडजीवसे॥इमाꣳरुद्रायतवसेकपर्दिनेक्षयद्वी ७
रायप्रभरामहेमतिं॥यथानःशमसद्द्विपदेचतुष्पदेविश्वं

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai. "

(9A)

पुष्टंग्रामेअस्मिंननातुरं॥मृडानोरुद्रोतनोमयस्कृधिक्षय
द्वीरायनमसाविधेमते॥यच्छंचयोश्चमनुरायजेपितातद
श्यामतवरुद्रप्रणीतौ॥मानोमहांतमुतमानोअर्भकंमान
उक्षंतमुतमानउक्षितं॥मानोवधीःपितरंमोतमातरंप्रिया
मानस्तनुवोरुद्ररीरिषः॥मानस्तोकेतनयेमानआयुषिमानो
गोषुमानोअश्वेषुरीरिषः॥वीरान्मानोरुद्रभामितोवधीर्ह
विष्मंतोनमसाविधेमते॥आरात्तेगोघ्नउतपूरुषघ्नेक्षय
द्वीरायसुम्नमस्मेतेअस्तु॥रक्षाचनोअधिचदेवब्रूह्यधाच

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10)

रु० ८

नः शर्म यछद्विबर्हाः ॥ स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीम
मुपहत्नुमुग्रं ॥ मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्नि
वपंतु सेनाः ॥ परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्म
तिरघायोः ॥ अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तन
याय मृडय ॥ मीढुष्टम शिवतम शिवो नः सुमना भ
व ॥ परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिना
कं बिभ्रदा गहि ॥ विकिरिद विलोहित नमस्ते अस्तु भगवः ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10A)



यास्तेसहस्रꣳहेतयोन्यमस्मंनिवपंतुताः॥सहस्राणि
धा२ सहस्रशोबाह्वोस्तवहेतयः॥तासामीशानोभगवःपरा
चीनामुखाकृधि॥१०॥सहस्राणिसहस्रशोयेरुद्राअ
धिभूम्यां॥तेषाꣳसहस्रयोजनेवधन्वानितन्मसि॥अस्मिं
महत्यर्णवेंतरिक्षेभवाअधि॥नीलग्रीवाःशितिकंठाःश
र्वाअधःक्षमाचराः॥नीलग्रीवाःशितिकंठादिवꣳरुद्राउप
श्रिताः॥येवृक्षेषुसस्पिंजरानीलग्रीवाविलोहिताः॥येभूता

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(11)
रुद्र०
१

नामधिपतयो विशिखासः कपर्दिनः ॥ येअन्नेषु विविध्यंति
पात्रेषु पिबतो जनान् ॥ येपथांपथिरक्षय ऐलबृदाय व्युधः ॥
येतीर्थानि प्रचरंति सृकावंतो निषंगिणः ॥ यएतावंतश्च भूयाꣳ
सश्च दिशो रुद्रा वितस्थिरे ॥ तेषाꣳ सहस्रयोजनेवधन्वानि तन्म
सि ॥ नमो रुद्रेभ्यो ये पृथिव्यां येंतरिक्षे ये दिवि येषामन्नं वातो
वर्षमिषवस्तेभ्यो [redacted] ॥ दश प्राचीर्द
दशो दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो न १
मस्ते नो मृडयंतु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com